Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ पार्वतीदैवत्यो महाश्रीमन्त्र उच्यते—

अर्जुन ऋषिः । अतिनिवृत्कृतिश्छन्दः । गौरी देवता । ह्रीं बीजम् । स्वाहा शक्तिः । ह्रीं नमो महाश्रीराजिते राजपूजिते हृत् । जये विजये गौरि गान्धारि शिरः । त्रिभुवनवशंकरि शिखा । सर्वलोकवशंकरि कवचम् । सर्वस्त्रीपुरुषवशंकरि नेत्रम् । सुदुधेवासुदुघेवा ह्रीं स्वाहा अस्त्रम् । ध्यानम्—

असकलशशिराजन्मौळिराबद्धपाशा-
ङ्कुशरुचिरकलाब्जा बन्धुजीवारुणाङ्गी ।
अमरनिकरवन्द्या त्रीक्षणा शोणलेपां-
शुककुसुमयुता स्यात् संपदे पार्वती वः ॥

ह्रीं नमो महाश्रीराजिते राजपूजिते जये विजये गौरि गान्धारि त्रिभुवनवशंकरि सर्वस्त्रीपुरुषवशंकरि सुदुघेवासुदुघेवा ह्रीं स्वाहा । इति मन्त्रः ॥ (त्रिपञ्चाशद्वर्णात्मकः) । अयुतं जपेत् । घृतसिक्तैः क्षीराद्यैः दशांशं पुरश्चरणहोमः ॥

अथ पूजा—

नवमे पटले भुवनेशीविधाने प्रोक्ते शाक्ते पीठे समावाह्य समर्चयेत् । अङ्गैः प्रथमावृतिः । मातृभिर्द्वितीयावृतिः । इन्द्रादिभिस्तृतीयावृतिः ।

अथ प्रयोगः —

तिलतण्डुलकैर्लोणैः त्रिमधुरसिक्तैः फलैश्च मधुरतरैः ।
आज्यैररुणकुवलयैस्त्रिदिनं हवनक्रिया सुवश्यकरी ॥

अयमर्थः — तिलैश्च तण्डुलैश्च मधुरतरफलैश्च आज्येन च अरुणकुवलयैश्च त्रिमधुरसिक्तैः संख्यानुक्ते सहस्रमिति न्यायात् सहस्रं जुहुयात्। तस्माद्वशीकरं भवति ॥ लोणं–मीठ। अरुणकुवलयं–செங்கெய்தல்பூ. मधुरतरफलं–कदलीपनसादिकम् ॥

प्रयोगान्तरम् —

नित्यं वाऽऽदित्यगतां देवीं प्रविचिन्त्य तन्मुखो जप्यात्।
अष्टोत्तरशतमह्वामादौ भुवनं वशीकरोत्यचिरात् ॥

प्रयोगान्तरम् —

वार्णादर्वाङ्मन्त्री प्रयोजयेत्साध्यनाम कर्मयुतम्।
प्रजपेद्वा हवनविधौ वाञ्छासिद्धिप्रदस्तथा मन्त्रः ॥

त्रिभुवनवशंकरीति वकारं च सर्वलोकवशंकरीति वकारं च वार्णमित्युक्तम् ॥